शुद्धिकौमुदी

पाठः १२ - १५.०७.२०१७

सुबन्ताः

© All the content in these slides is the intellectual property of Vyoma Linguistic Labs Foundation.
Replication/reuse in any form without express written permission from the organisation is prohibited.

९२. अद्य समाजस्य **परिस्थितिः** शोचनीया अस्ति ।

'**परिस्थितिः**' इति प्रयोगः समर्थनार्हः एव ।

अत्र 'परि' इति उपसर्गः । गतिनिवृत्त्यर्थकः ष्ठाधातुः । क्तिन्-प्रत्ययः । तस्मात्, 'परिस्थितिः' इति रूपम् ।

"परि इत्येतस्मिन् उपसर्गे स्थितात् निमित्तात् (इकारात्) परस्य ष्ठाधातुसम्बद्धस्य सकारस्य षत्वं स्यात् – 'उपसर्गात् सुनोति....' (पा.सू. ८.३.६५) इति सूत्रेण । तस्मात्, 'परिष्ठितिः' इति रूपम् । षत्वम् अत्र नित्यम् इत्यतः षत्वरहितं रूपम् असाधु इति केचन अभिप्रयन्ति । परि इत्यस्य 'स्था'क्रियया यदि योगः उच्यते तदा एव षत्वस्य प्रसङ्गः । यदि 'परिगता स्थितिः' इति विवरणम् उक्त्वा 'परि' इत्यस्य गम्-धातुना सम्बन्धः उच्यते (न तु ष्ठाधातुना) तदा तु षत्वं न । एवं गम्-धातोः प्रश्लेषः क्रियते अत्र ।

एवं प्रादेः धात्वन्तरे सम्बन्धं कल्पयित्वा षत्वस्य निवारणं भाष्ये एव कृतं दृश्यते 'निस्सेचकः' 'अभिसावकीयति' इत्यादौ । 'यं प्रति क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञकाः भवन्ति' इति महाभाष्यकारः । 'यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञकाः इति दुर्धियः इत्यत्र हल्सन्धिप्रकरणे।)

'परिस्थितिः' इति शब्दः लोके बहुधा श्रूयते इत्यतः भाष्योक्तं क्रमम् अवलम्ब्य स्थितस्य गतिः चिन्तिता अत्र ।

९४. **निस्स्थानात्** यानम् इदानीं निर्गतम् ।

’**निस्स्थानात्**’ इति प्रयोगः न दोषाय ।

’निर्’-उपसर्गपूर्वकात् ष्ठाधातोः अधिकरणे ल्युट् । ’निर्’ इत्येतस्मात् निमित्तात् परस्य ष्ठाधातुगतस्य सकारस्य कुतः षत्वं न इति प्रश्नः अत्रापि उद्भवेत् एव । ’निस्स्थानम्’ इत्यस्य विग्रहः उच्यते – ’निर्गत्य तिष्ठन्ति अत्र’ (यानानि) इति । उपसर्गस्य गमधातौ योगः, न तु ष्ठाधातौ । तस्मात् (उपसर्गयोगाभावात्), ’उपसर्गात् सुनोति….’ इति सूत्रेण न षत्वम् ।

एवं गम्-धातोः प्रश्लेषात् षत्वं निवार्यते । भाष्योक्तः एव अयं क्रमः इत्यतः एतस्य अनुसरणं न दोषाय । स्थितस्य गतेः चिन्तनाय अयं क्रमः आश्रीयते ।

’निस्स्थानम्’ इत्यत्र सकारद्वयं लेखनीयं, विसर्गसकारौ वा लेखनीयौ इति तु न विस्मर्तव्यम् ।

सुबन्ताः

---

९५. **दुर्वासः** कोपशीलः मुनिः ।

’दुर्वासः’ इति अपशब्दः । **’दुर्वासाः’** इति प्रयोक्तव्यम् ।

दूर्वासश्शब्दः सकारान्तः । ’दुर्वासस्’ इति प्रातिपदिकम् । तस्मात्, प्रथमाविभक्तेः एकवचने कृते ’दुर्वासाः’ इति रूपम् । (विसर्गात् पूर्वम् आकारः श्रूयते, न तु अकारः) सः अकारान्तः इति केषाञ्चित् भ्रमः ।

९६. **दुर्वासमुनिः** शकुन्तलायै शापं दत्तवान् ।

दुर्वासमुनिः इति अशुद्धम् । **दुर्वासोमुनिः** इति प्रयोक्तव्यम् ।

दूर्वासश्शब्दः सकारान्तः इति पूर्वम् उक्तम् । समासे सकारस्य रुत्वे हश्-परत्वात् उत्वे गुणे च ’दुर्वासोमुनिः’ इति रूपम् । (मकारः हश्) ।

सुबन्ताः

१७. 'मेनका' नाम **अप्सरकन्या** भूलोकम् आगता ।

'अप्सरकन्या' इति अपशब्दः । '**अप्सरःकन्या**' इति प्रयोक्तव्यम् ।

अप्सरश्शब्दः सकारान्तः । (बहुवचनान्तः सः । एकवचनान्तप्रयोगोऽपि शिष्टसम्मतः इति पूर्वम् उक्तम्) । 'अप्सराः + कन्या' इति विग्रहे अप्सरश्शब्दस्य प्रातिपदिकरूपेण अवस्थितौ 'कुप्वोः क पौ च' (पा.सू. ८.३.३७) इति सूत्रेण सकारस्य जिह्वामूलीयत्वं विसर्गो वा । तस्मात् 'अप्सरःकन्या' इति रूपम् ।

एवमेव अप्सरोगणः, अप्सरोनगरी, अप्सरःपुत्री, अप्सरःकुलम् इत्यादयः अपि । विसर्गसन्धिप्रक्रिया अत्र स्मर्तव्या ।

९८. प्रकोष्ठे **अनुकूलं** बहु अस्ति ।

‘अनुकूलम्’ इति पदम् अत्र परिहरणीयम् । **‘आनुकूल्यम्’** इति प्रयोक्तव्यम् । वक्त्रा अत्र भाववाचकः शब्दः प्रयोक्तुम् इष्टः । अनुकूलः धर्मिपरः अनुकूलस्य भावः आनुकूल्यम् । अतः ‘आनुकूल्यम्’ इति पदम् एव प्रयोक्तव्यम् ।

यदि ‘अनुकूल’शब्दप्रयोगे एव प्रीतिः तर्हि ‘प्रकोष्ठः अनुकूलः अस्ति ‘ इति प्रयुज्यताम् । अनुकूलशब्दं प्रकोष्ठस्य विशेषणं क्रियताम् ।

९९. **भारतसदृशे** विशाले देशे अभिप्रायभेदः सहजः ।

‘भारतसदृशे’ इति प्रयोगः अनुचितः अत्र । **‘भारत’**शब्दः प्रयोक्तव्यः । ‘भारतं विशालः देशः । अत्र अभिप्रायभेदः सहजः इति वक्तुम् इच्छति वक्ता । किन्तु तेन पदप्रयोगः कृतः अस्ति – ‘भारतसदृशे देशे’ इति । भारतसदृशः देशः कश्चित् अन्यः भवति, न तु भारतम् । वक्ता भारतविषये वक्तुम् इच्छति, न तु भारतसदृशस्य अन्यस्य कस्यचित् देशस्य विषये । अतः **‘विशाले भारतदेशे’** इति आनुपूर्वी शोभते । सदृशशब्दप्रयोगात् तु अन्यस्य देशस्य प्रतीतिः भवति, न तु भारतस्य । तत् तु वक्त्रा न इष्टम् । अतः अभिप्रायानुगुणस्य शब्दप्रयोगस्य विषये अधिकम् अवधानं दातव्यम् ।

१००. **भवादृशे सति** का भीतिः अस्माकम्?

'भवति सति' इति प्रयोगः साधुः । धीरं बुद्धिमन्तं वा कञ्चित् उद्दिश्य उक्तं वाक्यम् एतत् । वक्त्रा पुरतः स्थितस्य भवत्पदवाच्यस्य जनस्यैव सत्ता इष्यते, न तु तत्सदृशस्य अन्यस्य कस्यचित् । स च भावः 'भवादृशे सति' इत्येतस्मात् न प्रतीयते । तस्मात् 'भवति सति' इति प्रयोगः एव अपेक्षितस्य भावस्य अभिव्यञ्जने समर्थः ।

१०१. अस्माकं **माताश्री** सम्यक् बोधयति ।

'माताश्री' इति अपशब्दः । **'मातृश्रीः'** इति प्रयोक्तव्यम् । विद्यालयस्य बालकस्य बालिकायाः वा उक्तिः इयम् । केषुचित् विद्यालयेषु अध्यापिका निर्दिश्यते 'माताश्री'शब्देन ।

'श्रीः' इत्येषः न ङ्यन्तः । अतः प्रथमैकवचने कृते न सुलोपः । तस्मात् विसर्गस्य श्रवणम् ।

मातृ+श्रीः इति स्थिते (मातृरूपा श्रीः इति मध्यमपदलोपी समासः वक्तव्यः भवेत् । स्थितस्य गतिः खलु चिन्तनीया?) मातृशब्दस्य प्रातिपदिकरूपेण स्थितौ 'मातृश्रीः' इति रूपम् । प्रातिपदिकं तु 'मातृ' इति । आकारः प्रथमैकवचनान्ते श्रूयते, न तु प्रातिपदिके । एवमेव पितृश्रीः, भ्रातृश्रीः इत्यादयः अपि ।

इदं तु स्मर्तव्यं यत् न एषा संस्कृतशैली इति ।

सुबन्ताः

१०२. अहं तं पृष्टवान् । तेन कापि **प्रतिक्रिया** न दर्शिता ।

‘प्रतिक्रिया’ इति अस्थाने । ‘**प्रतिस्पन्द**’शब्दः, शब्दान्तरं वा प्रयोक्तव्यम् ।

‘प्रतिक्रिया’ शब्दः प्रतीकारार्थकः, निवारणोपायार्थकः वा । क्रियायाः अनन्तरं या अन्यस्य क्रिया भवति तां ‘प्रतिक्रिया’शब्दः बोधयितुं नार्हति । प्राचीनैः कुत्रापि तस्मिन् अर्थे प्रयोगः कृतः न दृश्यते । अतः ‘प्रतिस्पन्दः’ इत्यस्य प्रयोगः वरम् । शब्दान्तरं वा प्रयोक्तव्यम् ।

१०३. भवान् अस्वस्थः । **सन्दर्भे**ऽस्मिन् जागरूकता आवश्यकी ।

‘अवसरे’ऽस्मिन् इति प्रयोक्तव्यम् । ‘सन्दर्भ’शब्दः अस्थाने । सन्दर्भः नाम ग्रन्थः । योजनम् इत्यादयः अर्थाः तस्य । कोषो यथा – ‘सन्दर्भस्तु प्रबन्धः स्यात्’ –(त्रिकाण्डः) ‘श्रन्थनं ग्रन्थनं गुम्फः सन्दर्भो रचना न ना’ – (वैजयन्ती) । अवसरादयः अर्थाः तस्य पदस्य न उक्ताः । तस्मात् ‘अवसरः’ इति प्रयोगः वरम् । शब्दान्तरस्य प्रयोगः अपि भवितुम् अर्हति ।

सुबन्ताः

१०४. अत्रत्या **प्रकृतिः** रमणीया अस्ति ।

'प्रकृतिः' इति पदम् अस्थाने । **'निसर्ग'**शब्दस्य प्रयोगः वरम् । 'प्रकृतिः' इति पदस्य बहवः अर्थाः सन्ति – स्वभावः, सृष्टिकारणीभूता, प्रजाः इत्यादयः । वक्त्रा तु दृश्यमाना सृष्टिः वर्ण्यते । प्रकृतिपदं सृष्टिं न बोधयति, अपि तु सृष्टिकारणीभूतं तत्त्वम् । तथा हि प्रयोगः – 'विश्वोत्पत्तिनिमित्तत्वात् प्रकृतिः प्रोच्यते बुधैः' (वेदान्त-कौस्तुभः) इति । प्रकृतिः भवति कारणम् । वक्त्रा तु कार्यं वक्तुम् इष्यते । तस्मात् 'निसर्गः', सृष्टिः' इत्यादिषु अन्यतमः शब्दः प्रयोक्तव्यः ।

१०५. एतत् श्रुत्वा सः नितरां **चकितः** जातः ।

'चकितः' इति पदम् अस्थाने । **'आश्चर्यान्वितः'** इति, **'आश्चर्यचकितः'** इति वा प्रयोक्तव्यम् । 'चकितः' नाम भीतः । कोषकारैः सर्वैः चकितपदस्य भीतियुक्तादयः एव अर्थाः वर्णिताः । आश्चर्यार्थः केनापि न उक्तः । अतः आश्चर्यार्थे चकितपदस्य प्रयोगः असाधुः एव भवति । तस्मात् यत्र आश्चर्यमात्रम् एव इष्यते तत्र 'आश्चर्यान्वितः' इति प्रयोगः करणीयः ।

यत्र आश्चर्यं भवति तत्र भीत्यंशः अपि सम्मिलितः भवति । तादृशे अवसरे 'आश्चर्यचकितः' इति प्रयोगः शक्यः ।

सुबन्ताः

१०६.सः **भाषणप्रतियोगितायां** भागं वोढुम् इच्छति ।

‘प्रतियोगिता’ इति कथञ्चित् समर्थनीयम् इति भाति । ‘**स्पर्धायाम्**’ इति प्रयोगः वरम् ।

यस्य अभावः उच्यते सः तस्य प्रतियोगी भवति । घटाभावस्य प्रतियोगी घटः । अयं च तर्कशास्त्रीयः पारिभाषिकः शब्दः कश्चन। स्पर्धायाम् अपि भागग्रहीत्रोः विरोधः परस्परं भवत्येव इति कृत्वा प्रतियोगिता नाम स्पर्धा इति व्याख्येयम् । प्राचीनैः कुत्रापि स्पर्धापर्यायत्वेन प्रतियोगिताशब्दः न प्रयुक्तः । सर्वैः अनुमते स्पर्धाशब्दे सति अप्रयुक्तस्य प्रतियोगितापदस्य प्रयोगे आस्था कुतः?

प्रतियोगितापदे एव अस्माकं प्रीतिः इति यदि सबलम् उच्यते तर्हि ‘भवतु नाम’ इति वदामः वयं विरुद्धसम्बन्धयुक्ततां मनसि निधाय । ‘स्पर्धा’शब्दस्य प्रयोगः एव श्रेयसे इति तु अस्माकं मतम् ।

सुबन्ताः

१०७. अहं तेन सह **वार्तां करोमि** ।

‘वार्ता’शब्दः अत्र अस्थाने । **‘वार्तालापं करोमि’** इति **‘सम्भाषणं करोमि’** इति वा वक्तव्यम् ।

करोतिः भाववाचकेन युक्तः सन् क्रियाम् अभिधत्ते । अतः एव एव अध्ययनं, पाकः, उद्घाटनम् इत्यादिभिः भाववाचकैः शब्दैः सह करोतिं योजयित्वा वयं क्रियां वदामः ।

वार्ताशब्दः न हि भाववाचकः । तस्मात् ‘वार्तां करोति’ इत्येतस्मात् ‘वार्तां निर्माति’ इत्यस्य अर्थस्य प्रतीतिः भवितुम् अर्हति। स च अर्थः अत्र न अभिप्रेतः । अतः ‘वार्तालाप’शब्दस्य प्रयोगः वरम् । ‘आलाप’शब्दः भाववाचकः । तस्मात् ‘वार्तालापं करोति’ इत्यस्य सङ्गतिः ।

अथवा यदि ‘आलापं करोति’ इत्यस्मात् ‘सम्भाषते’ इत्यर्थः न प्रतीयते इति चिन्त्यते तर्हि ‘सम्भाषणं करोति’ इत्येव प्रयुज्यताम् । अथवा ‘सम्भाषते’ इति अखण्डक्रियापदं वा प्रयुज्यताम् ।

सुबन्ताः

१०८. **अन्तर्देशीय**पत्रस्य मूल्यम् इदानीं सार्धद्विरूप्यकात्मकम् ।

'**देशीयम्**' इत्यनेन एव इष्टसिद्धिः । अथवा 'अन्तर्देशीयम्' इत्येव वा भवतु ।

विदेशसम्बद्धस्य व्यवहारस्य निमित्तं यत् पत्रम् उपयुज्यते, तस्य 'विदेशीयं पत्रम्' इति नाम भवितुम् अर्हति । यस्य उपयोगः देशे भवति, तत् 'देशीयं' पत्रम् । 'देशीयम्' इत्यस्य अर्थः 'देशसम्बन्धी' इति । देशस्य अन्तः एव तस्य उपयोगः भाव्ति, न तु देशात् बहिः स्थितेषु अन्येषु देशेषु । एवं, 'देशीयम्' इत्यस्मात् एव अपेक्षितस्य अर्थस्य भानं भवति । तस्मात्, तेन सह 'अन्तर्'शब्दस्य योजनं वस्तुतः न आवश्यकम् ।

किन्तु, पत्रालयविभागेन 'अन्तर्देशीय'शब्दः एतावता एव व्यवहारम् आनीतः । स्थितस्य गतिः खलु चिन्तनीया ? तस्मात् एवं विग्रहः उच्यते – देशस्य अन्तः अन्तर्देशः । एकदेशिसमासः अत्र । देशस्य अन्तर्भागः इत्यस्य अर्थस्य सिद्धिः । अन्तर्देशसम्बन्धि अन्तर्देशीयम् ।

सुबन्ताः

१०९. **स्वदेशी**वस्तूनाम् उपयोगः एव करणीयः सर्वैः ।

’स्वदेशी’ इति शब्दः अस्थाने । ’**स्वदेशीय**’शब्दः प्रयोक्तव्यः । ’**देशीय**’शब्देनापि इष्टसिद्धिः ।

स्वस्य देशः स्वदेशः । स्वदेशस्य इदं स्वदेशीयम् । ’स्वदेश’ इत्येतस्मात् शब्दात् तु ’स्वदेशवान्’ इत्यस्य अर्थस्य प्रतीतिः भवति । (स्वस्य देशः स्वदेशः । स्वदेशः अस्य अस्ति इति स्वदेश.. स्वदेशवान् इत्येषः अर्थः अत्र न अभिप्रेतः)

अत्र देशे द्विविधानि वस्तूनि उपलभ्यन्ते – बहुराष्ट्रीयाभिः संस्थाभिः निर्मीयमाणानि, देशीयाभिः संस्थाभिः निर्मीयमाणानि चेति । देशीयसंस्थाभिः निर्मितानि उच्यन्ते ’स्वदेशीयानि’ इति । वस्तुतः तु ’देशीयानु’ इति कथनात् एव ’अस्मद्देशीयानि’ इत्यस्य अर्थस्य प्रतीतिः भवति । तस्मात् ’स्व’शब्दस्य त्यागात् अपि अपेक्षितस्य अर्थस्य प्रतीतिः भवेत् एव । तथापि ’स्व’शब्दस्य योजनात् एव अपूर्वोत्पत्तिः इति यदि चिन्त्येत तर्हि भवतु नाम तत् ।

स्वशब्दस्य योजनात् विशिष्टार्थस्य भानं तु न भवति ।

सुबन्ताः

१११०. बालः **स्वमातापितरौ** नमस्कृतवान् ।

'**मातापितरौ**' इत्येतावता एव इष्टसिद्धिः । स्वशब्दः परिहर्तुं शक्यः ।

'स्व'शब्दः सर्वत्र योज्यते अस्माभिः । बहुत्र तस्य योजनं न आवश्यकं भवति ।

प्रकृतवाक्ये 'मातापितरौ' इत्येतावता एव 'स्वस्य' इत्यस्य अर्थस्यापि भानं भवति । यदा अन्यस्य मातापितरौ निर्देष्टव्यौ तदा अन्यादिपदानां योजनं करणीयं भवति ।

चारुदेवशास्त्रिणः एतद्विषये वदन्ति – 'पित्रादयस्सम्बन्धिशब्दास्तत्र सम्बन्धाख्यायकः स्वशब्दो नापेक्ष्यते, न च योज्यते' इति ।

सुबन्ताः

अधोनिर्दिष्टानि वाक्यानि परिशील्यन्ताम् –

- रामः स्वपितुर्भवनं जगाम ।
- सः स्वमातारं नमस्कृतवान् ।
- बालः स्वबान्धवान् निमन्त्रितवान् ।
- बालः स्वगुरुं नमस्कृतवान् ।
- सा स्वपतिम् उक्तवती ।
- सः स्वपत्नीम् आहूतवान् ।
- बालः स्वहस्तं दर्शितवान् ।
- सः स्वगृहं गतवान् ।

एतेषु सर्वेषु वाक्येषु स्वशब्दः परिहर्तुं शक्यः, परिहरणीयश्च । स्वतः सिद्धस्य सम्बन्धस्य द्योतनाय पुनः स्वशब्दस्य प्रयोगः न उचितः । एतादृशेषु वाक्येषु स्वशब्दस्य त्यागात् एव संस्कृतत्वस्य सिद्धिः ।

सुबन्ताः

१११. कश्चित् **व्यापारी** सम्यक् **व्यापारं** करोति स्म ।

’व्यापारी’ इत्यस्य स्थाने ’**वणिक्**’ इति, ’व्यापार’पदस्य स्थाने ’**वाणिज्यम्**’ इति च प्रयोगः वरम् ।

’व्यापार’पदस्य ’वाणिज्यम्’ इति न अर्थः । ’क्रियासामान्यं व्यापारपदेन उच्यते । वाणिज्यम् इति कश्चन व्यापारः । तत् व्यापारेषु अन्यतमम् । हस्तचलनादयः अपि व्यापाराः एव । किन्तु, ते वाणिज्यपदवाच्याः न ।

प्रादेशिकभाषासु सर्वासु ’व्यापार’पदेन वाणिज्यार्थः निर्दिश्यते । संस्कृते तु वाणिज्यं क्रयविक्रयसम्बन्धि । व्यापारश्च हस्तपादादिचलनरूपः सर्वोऽपि व्यवहारः ।

अतः, क्रयविक्रयादिरूपे व्यवहारे ’वाणिज्य’पदस्य प्रयोगः, तत्कर्तुः निर्देशाय ’वणिक्’शब्दप्रयोगश्च वरम् ।

सुबन्ताः

११२. कश्चन **साधुः** ग्रामसीमायां निवसति स्म ।

’**संन्यासी**’ इति, ’**विरागी**’ इति वा प्रयोगः शोभते ।

साधुः नाम सभ्यः सत्पुरुषः । साधुशब्दः संन्यासिनः पर्यायपदं न । यः संन्यासी भवति सः साधुः (सज्जनः) भवति । किन्तु, यः साधुः भवति सः संन्यासी एव भवेत् इति न नियमः । उत्तमस्वभाववान् सर्वोऽपि साधुः भवति । संन्यासी तु काम्यकर्मपरित्यागी, सर्वकर्मफलत्यागी च ।

- काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः । - भगवद्गीता १८.२

एवं साधुत्वं व्यापकः धर्मः, संन्यासः व्याप्यः धर्मः । प्रापञ्चिकविषयेषु अनादरवान् ’विरागी’ इति उच्यते । प्रकृतवाक्ये तु ’संन्यासी’ इति ’विरागी’ इति वा प्रयोगः शोभते ।

कोषकारः हेमचन्द्रः एकः एव – ’साधुर्जैने मुनौ वार्धुषिके सज्जनरम्ययोः’ इति वदति । तस्य दृष्ट्या साधुः नाम जैनमुनिः अपि । अन्ये कोषकाराः तु साधुः इत्यस्य सज्जनाद्यर्थमात्रं लिखितवन्तः दृश्यन्ते ।

सुबन्ताः

११३. तस्य **सांसारिकं** जीवनं सुखमयं नास्ति ।

'सांसारिकम्' इति अस्थाने । '**कौटुम्बिकम्**' इति प्रयोक्तव्यम् । संसारः नाम इहप्रपञ्चः । मातापितापुत्रादयः कुटुम्बशब्देन निर्दिश्यन्ते । एतस्मिन् वाक्ये सुखाभावह् उच्यते कौटुम्बिकजीवने । यः सांसारिकजीवने सुखं न पश्यति, सः विरक्तः सन् संन्यासाश्रमं अवलम्बेत । यः कौटुम्बिकजीबने सुखं न पश्यति स तु खिद्यमानः सन्नपि सुखप्राप्तये पुनः प्रयतते ।

११४. तस्य पत्नीपुत्रादयः **परिवारजनाः** नगरान्तरम् अगच्छन् ।

'परिवारजनाः' इति शब्दप्रयोगः अत्र अनुचितः । '**कुटुम्बजनाः**' इति प्रयोक्तव्यम् ।

संस्कृतभाषायां परिवारः नाम परिजनाः = सेवकादीनां गणः । तस्मात्, पत्नीपुत्रादयः न परिवारजनाः, अपि तु कुटुम्बजनाः । अतः एव, निमन्त्रणपत्रादिषु 'सकुटुम्बं सपरिवारम् आगन्तव्यम्' इति मुद्र्यते । तस्मात् स्पष्टं यत् परिवारः कुटुम्बात् अन्यः इति ।

११५. ज्येष्ठान् द्रष्टुं **रिक्तहस्तेन** मा गच्छ ।

'रिक्तहस्तेन' इति अस्थाने । '**रिक्तहस्ततया**' इति प्रयोक्तव्यम् । रिक्तः हस्तः रिक्तहस्तः । गमनक्रियायां हस्तस्य न करणत्वम् । अतः 'रिक्तहस्तेन' इति तृतीयान्तं पदम् अन्वयितं तिष्ठति । 'रिक्तः हस्तः यस्य सः' इति विग्रहः वक्तुं शक्यः रिक्तहस्तपदस्य । तदा तु रिक्तहस्तः स्यात् कर्ता । कर्तरिप्रयोगत्वात् अत्र कर्तुः प्रथमा । तद्विशेषणस्यापि प्रथमा एव स्यात्, न तु तृतीया । अतः 'रिक्तहस्तः' इति बहुव्रीहिसमासोपेतं पदं कर्तुः विशेषणं भवितुम् अपि नार्हति । क्रियायां तु धर्मपरः शब्दः अन्वेति । -रिक्तहस्तस्य भावः रिक्तहस्तता । तस्य तृतीयान्तत्वेन क्रियायाम् अन्वयः । अतः 'रिक्तहस्ततया' इति प्रयोगः एव साधुः ।

यदि 'रिक्तहस्तेन' इति प्रयोक्तव्यम् एव इति तीव्रेच्छा तर्हि कर्मणि प्रयोगः अवलम्ब्यताम् । यथा –ज्येष्ठान् द्रष्टुं रिक्तहस्तेन न गन्तव्यम् इति ।

किन्तु एतदत्र स्मर्तव्यं यत् वक्ता यदि पुमान् भवति तदा एव एतत् वाक्यं सम्भवति । यदा स्त्रिया उच्यते तदा तु ' रिक्तहस्तया न गन्तव्यम्' इति प्रयोगः स्यात्, न तु 'रिक्तहस्तेन' इति ।

सुबन्ताः

११६. एषः **कोषः/कोशः** उत्तमः अस्ति ।

'कोषः' 'कोशः' इति उभयथा अपि साधु । निष्कर्षार्थकः कुषधातुः । अधिकरणादौ घञ् । 'कोषः' इति रूपम् । (मूर्धन्यः षकारः) कोषकारैः तालव्योपेतं (शकारोपेतम्) रूपम् अपि दृश्यते । तस्मात् तालव्योपेतम् अपि रूपं(कोशः इति रूपम्) साधु एव । अमरकोषस्य सुधाव्याख्याने लिख्यते – 'कुश- संश्लेषणे । तालव्याः मूर्धन्याश्चैते इत्यधिकारे कोशविशदौ च इति शभेदः' इति । नपुंसकलिङ्गः अपि अयं शब्दः । तस्मात् कोषं/कोशम् इत्यपि रूपम् ।

११७. **कृषिकः/कृषकः** क्षेत्रे कृषिं करोति ।

'कृषिकः' 'कृषकः' इति रूपद्वयम् अपि साधु ।

'कृष विलेखने' इति धातुः । क्वुन्प्रत्यये 'कृषकः' इति रूपम् । किकन्-प्रत्यये 'कृषिकः' इति रूपम् ।

सुबन्ताः

११८. गणपतेः वाहनम् **मूषकः/मूषिकः** ।

'मूषकः' 'मूषिकः' इति उभयम् अपि साधु । स्तेयार्थकस्य मुषधातोः ण्वुल्-प्रत्यये 'मूषकः' इति रूपम् । तस्यैव धातोः 'किकन्'प्रत्यये (दीर्घे च) मूषिकः इति रूपम् ।

मुषधातोः अच्-प्रत्यये 'मूष' इति रूपम् । तस्यापि 'मूषिकः' इत्येव अर्थः ।

११९. एषः **नारिकेलः/नालिकेरः** उन्नतः अस्ति ।

'नारिकेलः', 'नालिकेरः' इति उभयम् अपि साधु । नार्याः वनितायाः केलः इव केलः यस्य इति विग्रहे पृषोदरादित्वात् 'नारिकेलः' इति रूपं साधु । रलयोः अभेदात् 'नालिकेरः' इत्यपि रूपम् ।

अत्र 'नारिकेलः' वृक्षवाची । तस्मात् पुंस्त्वं युक्तम् । फलवाचित्वे तु नपुंसकता ।

१२०. सैनिकः **प्रतिकाराय / प्रतीकाराय** प्रयतते ।

'प्रतिकारः' प्रतीकारः' इति उभयम् अपि साधु । करणार्थकस्य कृञ्-धातोः घञ्-प्रत्यये 'प्रतिकारः' इति रूपम् । 'उपसर्गस्य घञ्मनुष्ये बहुलम्'(६.३.१२२) इति सूत्रेण दीर्घः । तस्मात् 'प्रतीकारः' इत्यपि रूपम् ।

१२१: हनुमान्/ हनूमान् रामस्य परमभक्तः ।

'हनुमान्' 'हनूमान्' इति उभयथा अपि साधु ।

'हनुः' इति उकारान्त पदम् । हन्धातोः औणादिके 'उ'प्रत्यये 'हनूः' इति रुपम् । तस्यैव धातोः औणादिकः 'ऊञ्'प्रत्ययः अपि भवति । तदा 'हनूः' इति रुपम् । हनूरस्य अस्ति इति हनुमान् । हनुरस्य अस्ति इति हनूमान् । उभयोः अपि प्रयोगः यथा -

मत्करोत्सृष्टवज्रेण हनुस्तस्य तदा क्षतः । नाम्नैष हरिशार्दूलः भविता **हनुमानिति** ।

- रामा. उत्तरकाण्डः

अहं केशरिणः क्षेत्रे वायुना जगदायुना । जातः कमलपत्राक्ष **हनूमन्नाम** वानरः ॥

-महा. -३.१२७

सुबन्ताः

१२२. तस्य **मध्यमाङ्गुली / मध्यमाङ्गुलिः** दीर्घा सस्ति ।

‘अङ्गुलिः’ ‘अङ्गुली’ इति उभयथा अपि साधु । ‘अङ्गुलिः’ इत्यत्र उलिच्प्रत्ययः । तस्यैव विकल्पेन ङीपि ‘अङ्गुली’ इति रूपम् ।

प्रयोगो यथा -

उद्वेजयत्य**ङ्गुलि**पार्ष्णिभागान् ।

- कुमार – १.११

त्याज्यो दुष्टः प्रियोऽप्यासीद**ङ्गुली**वोरगक्षता ।

- रघु – १.१८

एवमेव व्यवहारे श्रूयमाणानां बहूनां शब्दानां रूपद्वयं रूपत्रयं वा क्वचित् श्रूयते । तानि रूपाणि यथासम्भवम् ऊह्यानि ।

सुबन्ताः

१२३. बालकः **प्रतिनित्यं** चलनचित्रं पश्यति ।

'प्रतिनित्यम्' इति अस्थाने । **'प्रतिदिनम्'** इति वक्तव्यम् । 'नित्य'शब्दः 'दिन'पर्ययः न । तन्नाम नित्यदिनयोः अभेदार्थकता न । 'नित्य'पदस्य नियत-शाश्वतादयः अर्थाः सन्ति । नियतं भवं नित्यम् इति भाष्योक्तिः । 'त्यब्नेर्ध्रुव इति वक्तव्यम्' इति वार्तिकम् । ['अव्ययात्त्यप्' (४.२.१०४ इति सूत्रे ।] तस्मात् एव यत् प्रतिदिनं न भवति, तदपि नित्यशब्देन निर्दिश्यते, नियतं भवतीति कृत्वा । एकादश्युपवासादयः अत्र उदाहरणानि । 'नित्यकर्म'शब्देन निर्दिश्यमानानि कानिचन कर्मणि प्रतिदिनं प्रवर्तन्ते इत्यतः नित्यदिनयोः अभेदः इति भ्रमः केषाञ्चित् । अतः, 'प्रतिदिनम्' इति प्रयोगः एव उचितः ।

अतः 'नित्योपयोगीनि वस्तूनि' इत्यस्य स्थाने 'दैनन्दिनोपयोगीनि वस्तूनि ' इति प्रयोगः युज्यते ।

१२४. पाण्डवेषु सहदेवः **कनीयः** ।

'कनीयः' इति अपशब्दः । 'कनीयान्' इति प्रयेक्तव्यम् । 'कनीयस्' शब्दः सकारान्तः । तस्य प्रथमैकवचनान्तं रूपं कनीयान् इति । 'युव'शब्दात् ईयसुन्प्रत्यये 'उगिदचाम्....' (७.१.७०) इत्यनेन नुम् । 'सान्तमहतः.....' इति दीर्घः । 'संयोगान्तास्य लोपः' इत्यनेन सकारलोपः । (सुलोपस्तु - 'हल्ङ्याभ्यो दीर्घात्.... ' इति सूत्रेण ।) कनीयश्शब्दः अकारान्तः इति तु भ्रमः एव ।

१२५. अद्य **प्रश्नोत्तरीस्पर्धा** अस्ति ।

'प्रश्नोत्तरी' इति अपशब्दः । '**प्रश्नोत्तरम्**' इति प्रयोक्तव्यम् । प्रश्नाः च उत्तराणि च एतेषां समाहारः प्रश्नोत्तरम् । समाहारद्वन्द्वे नपुंसकं स्यात् 'स नपुंसकम्' (२.४.१७) इति सूत्रेण । अतः 'प्रश्नोत्तरम्' इति रूपम् ।

यदि समाहारद्वन्द्वः न इष्यते तर्हि प्रश्नाः च उत्तराणि च प्रश्नोत्तराणि, तेषां स्पर्धा प्रश्नोत्तरस्पर्धा । तदा अपि न ईकारः प्रश्नोत्तरशब्दे। द्विगुसमासे तु 'अकारान्तोत्तरपदो द्विगुः स्त्रियाम् इष्टः' इति वार्तिकेन स्त्रीत्वं, ततः 'द्विगोः' इति सूत्रेण ङीप् । तस्मात् 'पञ्चवटी' इत्यादीनि रूपानि । 'प्रश्नोत्तरम्' इत्यत्र न द्विगुः, तस्मात् ङीप् अपि न । यस्मात् 'प्रश्नोत्तरी' इति रूपं तु असाधु एव ।

१२६. शिवरामेण **शिक्षाशास्त्री** पठिता ।

'**शिक्षाशास्त्रं पठितम्**' इति कथनम् औचित्यम् आवहति । यथास्थितं तु इदं वाक्यम् आकुलितम् अस्ति । न हि 'शिक्षाशास्त्री' इत्येषः शब्दः स्त्रियाम् । अतः 'पठिता' इति प्रयोगः असाधुः ।

'शिक्षाशास्त्री' इति उपाधेः (उपाधिमतः वा) नाम । तच्च पदम् इन्नन्तम् । अतः 'शिक्षाशास्त्रिणम्' इति स्यात् द्वितीयान्तः प्रयोगः । पठनविषयः न च उपाधिः । पठ्यते हि शास्त्रम् । अतः शिक्षाशास्त्रं पठितम् इति प्रयोगः औचित्यम् आवहति ।

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

For downloading course-materials, login @
www.sanskritfromhome.in

Subscribe to our youtube channel @
vyoma-samskrta-pathasala

Buy our Samskrita-learning products @
www.digitalsanskritguru.com

Support our cause for Samskrita-Samskriti @
www.vyomalabs.in

vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.